"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।
लोहसिंहानिका किट्टी सिंहाणञ्च निगद्यते ॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके ।
तस्मात् सर्व्वत्र मण्डूरं रोगशान्त्यै प्रयोजयेत् ॥"
अथास्य मारणविधिर्यथा,—
"दग्ध्वाक्षकाष्ठैर्मलमायसन्तु
गोमूत्रनिर्व्वापितमष्टवारान् ।
विचूर्ण्य लीढं मधुनाचिरेण
कुम्भाह्वयं पाण्डुगदं निहन्ति ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥ )

मण्डोदकं, क्ली, (मण्ड इव उदकमस्य मण्डमिश्रितमुदकमत्रेति वा । ) चित्तरागः । विचित्रवर्णः । आतर्पणम् । आलिम्पना । इति मेदिनी । के, २०७ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"तस्य पिष्टस्य भागांस्त्रीन् क्षिप्तभागविमिश्रितान् ।
मण्डोदकार्थे क्वाथञ्च दद्यात् तत्सर्व्वमेकतः ॥") ।

मत् व अनहमहम् । अत्वं त्वं भवति त्वद्भवति अनहमहं मद्भवतीति संक्षिप्तसारव्याकरणम् ॥ अस्मच्छब्दाच्विप्रत्यये कृते तत्सुकि अस्मच्छब्दस्य मदादेशान्निष्पन्नम् । इति तट्टीकायां गोयीचन्द्रः ॥

मतं, क्ली, ( मन्+भावे क्तः । ) सम्मतम् । तत्पर्य्यायः । छन्दः २ अभिप्रायः ३ आकूतम् ४ भावः ५ आशयः ६ । इति हेमचन्द्रः ॥

मतः, त्रि, ( मन्+कर्म्मणि क्तः । ) सम्मतः । ज्ञातः । इति मेदिनी । ते, ३२ ॥ ( यथा, रघौ । २ । ५७ ।
"किमप्यहिंस्यस्तव चेन्मतोऽहं
यशःशरीरे भव मे दयालुः ॥" )
अर्च्चितः । इति हेमचन्द्रः ॥

मतङ्गः, पुं, ( माद्यति मादात्मनेन वेति । मद्+ "मदेर्भिर्य्यस्मि हर्षे । इत्युणादिकोष टीकोक्तसूत्रादङ्गच् । दस्य तः । ) मुनिभेदः । ( यथा, रघौ । ५ । ५३ ।
"मतङ्गशापादवलेपमूला-
दवाप्तवानस्मि मतङ्गजत्वम् ॥" )
मेघः । इत्युणादिकोषः । १ । २७ ॥

मतङ्गजः, पुं, ( मतङ्गः मेघ इव जायते तदाख्यमुनेर्जातो वेति । जन+ड ।) हस्ती । इत्यमरः । २।८।३४॥ (यथा, कामन्दकीये नीतिसारे ।१५।७।
"ग्रीष्मे प्रभूताम्बुवनेन यायात्
निर्वासनार्थं करिणां यथा तु ।
क्षतेऽम्भसो ग्रीष्मकृतात् प्रतापात्
भवन्ति कुष्ठानि मतङ्गजानाम् ॥" )

मतल्लिका, स्त्री, प्रशस्तम् । इत्यमरः । १ ।४।२७॥

मतिः, स्त्री, ( मन्यतेऽनयेति । मन्+क्तिन् । ) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, देवीभागवते । १ । १७ । २८ ।
"मतिस्तु द्विविधा लोके युक्तायुक्तेति सर्व्वथा ।")
इच्छा । स्मृतिः । इति मेदिनी । ते, ४३ ॥
आर्य्यम् । शाकभेदः । इत्यजयपालः ॥ * ॥
"विप्रेन्द्र ! का प्रशंसेयं जन्म ते ब्रह्ममानसे ।
यस्य यत्र कुले जन्म तन्मतिस्तादृशी भवेत् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः ॥
मतिकरौषधम् । यथा,—
"पाठा द्वे जीरके कुष्ठमश्वगन्धाजमोदकम् ।
वचा त्रिकटुकञ्चैव लवणं चूर्णमुत्तमम् ॥
ब्राह्मीरसैर्भावितञ्च सर्पिर्मधुसमन्वितम् ।
सप्ताहं भक्षितं कुर्य्यान्मदैश्वर्य्यं मतिं परम् ॥"
इति गारुडे १६८ अध्यायः ॥

मतिदा, स्त्री, ( मतिं ददातीति । दा+कः । ) ज्योतिष्मती । शिम्बड़ीक्षुपः । इति राजनिर्घण्टः ॥ ( मतिदातरि, त्रि । )

मतिभ्रमः, पुं, ( मतेर्बुद्धेर्भ्रमः । ) बुद्धिभ्रंशः । ("अस्थान एवास्य मतिभ्रमः ।" इति पातञ्जलयोगसूत्रभाष्ये वेदव्यासः ।) तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिभ्रान्तिः, स्त्री, ( मतेर्बुद्धेर्भ्रान्तिः । ) बुद्धिभ्रंशः । तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिविभ्रंशः, पुं, ( मतेर्बुद्धेर्विभ्रंशः । ) उन्मादरोगः । इति राजनिर्घण्टः ॥

मतिष्ठः, त्रि, ( अयमनयोरयमेषामतिशयेन मतिमान् वेति । मतिमत्+इष्ठन् । मतुपो लोपः । ) अतिशयबुद्धिमान् । इति मुग्धबोधव्याकरणम् ॥

मत्कः, पुं, ( माद्यतीति । मद्+क्विप् । ततः स्वार्थे कन् । ) मत्कुणः । इति शब्दमाला ॥ ( मम अयम् । अस्मद् शब्दादिदमर्थे कन् । मदादेशश्च । ) मत्सम्बन्धिनि त्रि । इति व्याकरणम् ॥ ( यथा, भट्टिः । ३ । ३२ ।
"नैतन्मतं मत्कमिति ब्रुवाणः
सहस्रशोऽसौ शपथानशप्यत् ॥" )

मत्कुणः, पुं, ( माद्यतीति । मद्+क्विप् कुणति इति कुण्+क । ततः । मच्चासौ कुणश्चेति । ) कीटविशेषः । छारपोका इति भाषा ॥ तत्पर्य्यायः । रक्तपायी २ रक्ताङ्गः ३ मञ्चकाश्रयः ४ । इति राजनिर्घण्टः ॥ उद्दंशः ५ । ( यथा, शिशुपालवधे । १४ । ६८ ।
"मत्कुणाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः ।
गच्छतः स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां क्षणम् ॥" )
निर्व्विषाणहस्ती । निःश्मश्रुपुरुषः । माकुन्दा इति भाषा ॥ नारिकेलः । इति मेदिनी । ने, ७० ॥ जङ्घात्राणम् । इति हेमचन्द्रः ।४।२७५॥

मत्कुणा, स्त्री, अजातलोमभगम् । इति शब्दरत्नावली ॥

मत्कुणारिः, पुं, ( मत्कुणस्य अरिः । मत्कुणनाशकत्वादस्य तथात्वम् ।) इन्द्राशनः । सिद्धि इति भाषा । इति शब्दमाला ॥
( विवृतिरस्य इन्द्राशनशब्दे विहिता ॥ )

मत्तः, पुं, ( माद्यतीति । मद्+कर्त्तरि क्तः । ) क्षरन्मदहस्ती । मातओयाला हाती इति भाषा ॥ तत्पर्य्यायः । प्रभिन्नः २ गर्ज्जितः ३ । इत्यमरः । २ ।८।३६॥ मतङ्गः ४ क्षरन्मदः ५ । इति शब्दरत्नावली ॥ धुस्तूरः । कोकिलः । महिषः । इति राजनिर्घण्टः ॥

मत्तः, त्रि, मत्तताविशिष्टः । सुरापाने विकलान्तःकरणः । तत्पर्य्यायः । शौण्डः २ उत्कटः ३ क्षीवः ४ । इत्यमरः । ३ । १ । २३ ॥ मदोत्कटः ५ । इति जटाधरः ॥ (यथा, देवीभागवते । २ । ८ । ४ ।
"ते पीत्वा मदिरां मत्ताः कृत्वा युद्धं परस्परम् ।"
यथाच माधवकृतरुग्विनिश्चये मदात्ययाद्यधिकारे ।
"मध्येन मत्तः पुरुषो मदेन ।" )
हृष्टः । मदीभिर्य्यस्मि हर्षे क्तः । इत्यमरभरतौ ॥ अविवेकी । ( यथा रामायणे । १ । ४४ ।१० । "बलान्मत्तो महाबलः ।"
"मत्तोऽविवेकी ।" इति तट्टीकायां रामानुजः ॥)

मत्तकाशिनी } मत्तकासिनी } स्त्री, उत्तमस्त्री । इत्यमरः । २ ।६।४॥ मत्त इव क्षीव इव कसति गच्छति मत्तकासिनी कस ज गतौ ग्रहादित्वाणिन् दन्त्यमध्या । मत्तेव काशते भाति मत्तकाशिनी तालव्यमध्यापि । इति भरतः ॥ ( यथा, महाभारते । १ । १७३।३६ ।
"न तासां सदृशीं मन्ये त्वामहं मत्तकाशिनि ! ।" )

मत्तकीशः, पुं, ( मत्तः सन् कीशो वानर इव । ) हस्ती । इति शब्दमाला ॥

मत्तरः, पुं, ममाधिकः । मत्तोऽतिशयः । अस्मच्छब्दात् तरप्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

मत्तवारणं, क्ली, ( मत्तं वारयतीति । वृ+णिच् ल्युः । ) प्रासादवीथीनां वरण्डः । कोठार वारान्दा इति भाषा ॥ (यथा, कुट्टनीमते ।६ ।
"दिव्यधराधरभूरिव राजति मत्तवारणोपेता ॥"
"प्रासादवीथीनां वरण्डकः ।" इति तट्टीका ॥ )
अपाश्रयः । प्राङ्गणावरणम् । इति हेमचन्द्रः । ४ । ७८ । विश्वश्च ॥ प्रासादवीथीनां कुक्कुटच्छदिः । कुन्दवृक्षवृति इति च पाठः । इति मेदिनी ।णे,११४॥ पूगचूर्णः । इति शब्दमाला ॥

मत्तवारणः, पुं, ( वार्य्यते संयम्यते शृङ्खलादिभिः इति वारणः । वृ+णिच् कर्म्मणि ल्युट् । मत्तश्चासौ वारणश्चेति । ) प्रक्षिप्तकटकुञ्जरः मत्तहस्ती । इति मेदिनी । णे, ११४ । हेमचन्द्रश्च । ४ । ७८ ॥

मत्ता, स्त्री, ( माद्यति मादयतीति । अन्तर्भूतण्यर्थान्मदधातोः+क्तः+स्त्रियां टाप् ।) मदिरा ।